तथा,—
"स्थिरलग्नं विष्णुमन्त्रे शिवमन्त्रे चरं शुभम् ।
द्विःस्वभावगतं लग्नं शक्तिमन्त्रे प्रशस्यते ॥"
अगस्त्यसंहितायाम् ।
"त्रिषष्ठायगताः पापाः शुभाः केन्द्रत्रिकोणगाः ।
दीक्षायान्तु शुभाः सर्व्वे बन्धुस्थाः सर्व्वनाशकाः॥"

अथ पक्षनियमः ।

"शुक्लपक्षे भवेद्दीक्षा कृष्णेऽप्यापञ्चमाह्निनात् ।
निषिद्धेष्वपि मासेषु विशेषो मुनिभिर्दतः ॥"
रत्नावल्याम् ।
"षष्ठी भाद्रपदे इषे तथा कृष्णचतुर्द्दशी ।
कार्त्तिके नवमी शुक्ला मार्गे शुक्ला तृतीयिका ॥
पौषे तु नवमी शुक्ला माघे शुक्ला चतुर्थिका ।
फाल्गुने नवमी शुक्ला चैत्रे कामचतुर्द्दशी ॥
वैशाखे चाक्षया चैव ज्यैष्ठे दशहरा तिथिः ।
आषाढ़े पञ्चमी शुक्ला श्रावणे कृष्णपञ्चमी ॥
एतानि देवपर्व्वाणि तीर्थकोटिफलं लभेत् ।
अत्र दीक्षा प्रकर्त्तव्या न मासञ्च परीक्षयेत् ॥
न वारं न च नक्षत्रं न तिथ्यादिकदूषणम् ।
न योगकरणञ्चैव शङ्करेण च भाषितम् ॥"
अन्यच्च मतम् ।
"चैत्रे त्रयोदशी शुक्ला वैशाखैकादशी सिता ।
ज्यैष्ठे चतुर्द्दशी कृष्णा आषाढ़े नागपञ्चमी ॥
श्रावणैकादशी भाद्रे रोहिणीसहिताष्टमी ।
आश्विने च महापुण्या महाष्टम्यप्यभीष्टदा ॥
कार्त्तिके नवमी शुक्ला मार्गशीर्षे सिते तथा ।
षष्ठी चतुर्द्दशी पौषे माघेऽप्येकादशी सिता ॥
फाल्गुने च सिता षष्ठी चेति कालविनिर्णयः ॥"
योगिनीतन्त्रे ।
"अयने विषुवे चैव ग्रहणे चन्द्रसूर्य्ययोः ।
रविसंक्रान्तिदिवसे युगाद्यायां सुरेश्वरि ! ॥
मन्वन्तरासु सर्व्वासु महापूजादिने तथा ।
चतुर्थी पञ्चमी चैव चतुर्दश्यष्टमी तथा ॥
तिथयः शुभदाः प्रोक्ता दीक्षाग्रहणकर्म्मणि ॥"
इत्यादिवचनात् चतुर्द्दश्यष्टमीति शक्तिविषयम् ।
चतुर्थीति गणेशविषयम् । तत्तत्कल्पोक्तत्वात् ।
"निन्दितेष्वपि मासेषु दीक्षोक्ता ग्रहणे शुभा ।
सूर्य्यग्रहणकालस्य समानो नास्ति भूतले ॥
विशेषतो महादेवि ! दीक्षाग्रहणकर्म्मणि ।
तत्र यद्यत् कृतं सर्व्वमनन्तफलदं भवेत् ॥
रविसंक्रमणे चैव सूर्य्यस्य ग्रहणे तथा ।
तत्र लग्नादिकं किञ्चिन्न विचार्य्यं कदाचन ॥
रविसंक्रमणे चैव नान्यदन्वेषितं भवेत् ।
न वारतिथिमासादिशोधनं सूर्य्यपर्व्वणि ॥"
एवं चन्द्रग्रहणेऽपि । तथा रुद्रयामले ।
"न कुर्य्याच्छाक्तिकीं दीक्षामुपरक्ते विभावसौ ।
न कुर्य्याद्वैष्णवीं तान्तु यदि चन्द्रमसो ग्रहः ॥"
एतच्च गोपालशैविद्यनरविषयम् ।
"अन्येषु पुण्ययोगेषु ग्रहणे चन्द्रसूर्य्ययोः ।"
इति गौतमीयात् ।
"सूर्य्यग्रहणकाले च नान्यदन्वेषितं भवेत् ।"
इति योगिनीहृदयाच्च ॥ * ॥

ताराद्रौ तु विशेषो यथा,—
"दीक्षाकालं प्रवक्ष्यामि नीलतन्त्रानुसारतः ।
कृष्णपक्षस्य चाष्टम्यां शुभे लग्ने शुभे क्षणे ॥
पूर्व्वभाद्रपदा युक्ते मित्रताराादिसंयुते ।
अथवा अनुराधायां रेवत्यां वा प्रशस्यते ॥
जानीयाच्छोभनङ्कालं मन्त्रस्य ग्रहणं प्रति ।
इषे चैव विशेषेण कार्त्तिके च विशेषतः ॥"
यामले ।
"श्रीपरा कालीबीजानि लोपो दौर्गञ्च यो मनुः ।
सूर्य्यस्योपग्रहे लब्धो नृणां मुक्तिफलप्रदः ॥
अमावास्या सोमवारे भौमवारे चतुर्द्दशी ।
सप्तमी रविवारे च सूर्य्यपर्व्वशतैः समा ॥"
कुलार्णवे ।
"सप्तमी रविवारे च सोमे दर्शस्तथैव च ।
चतुर्थी कुजवारे च अष्टमी च बृहस्पतौ ॥
देवपर्व्वसमा ज्ञेयास्तासु दीक्षां समाचरेत् ॥"
यामले ।
"पुण्यतीर्थे कुरुक्षेत्रे देवीपीठचतुष्टये ।
प्रयागे श्रीगिरौ काश्यां कालाकालं न शोधयेत्॥"
विष्णुयामले ।
"देवीबोधं समारभ्य यावत् स्यान्नवमी तिथिः ।
कृता तासु बुधैर्द्दीक्षा सर्व्वाभीष्टफलप्रदा ॥
शुक्लपक्षे विशेषेण तत्रापि तिथिरष्टमी ।
तत्रापि शारदी दुर्गा यत्र देवी गृहे गृहे ॥
तत्र दीक्षा प्रकर्त्तव्या मासर्क्षादीन्न शोधयेत् ॥"
तथा ।
"बोधने चैव दुर्गायाः कालाकालं न शोधयेत् ॥
अशोकाख्याष्टमी यत्र रामाख्या नवमी तथा ।
लग्ने वाप्यथवालग्ने यत्र स्यात्तिथिरष्टमी ॥
गुरोराज्ञानुरूपेण दीक्षा कार्य्या विशेषतः ॥"
समयाचारतन्त्रे ।
"युगाद्यायां जन्मदिने विवाहदिवसे तथा ।
विषुवायनयोर्द्दन्द्वे नैव किञ्चिद्विचारयेत् ॥"
तथा,—
"शिष्यानाहूय गुरुणा कृपया दीयते यदा ।
तदा लग्नादिकं किञ्चिन्न विचार्य्यं कथञ्चन ॥
सर्व्वे वारा ग्रहाः सर्व्वे नक्षत्राणि च राशयः ।
यस्मिन्नहनि सन्तुष्टो गुरुः सर्व्वे शुभावहाः ॥"
सारसंग्रहे योगिनीतन्त्रे च ।
"ग्रहणे च महातीर्थे नास्ति कालस्य निर्णयः ।
गयायां भास्करक्षेत्रे विरजे चन्द्रपर्व्वते ॥
चट्टले च मतङ्गे च तथा कन्याश्रमेषु च ।
न गृह्णीयात्ततो दीक्षां तीर्थेष्वेतेषु पार्व्वति ! ॥"
वाराहीतन्त्रे ।
"शुक्रोऽस्तो यदि वा वृद्धो गुर्व्वादित्यो भवेद्यदि ।
मेषवृश्चिकसिंहेषु तदा दोषो न विद्यते ॥"*॥
महाविद्यासु सर्व्वासु कालादिविचारो नास्ति ।
तदुक्तं मुण्डमालातन्त्रे ।
"कालादिशोधनं नास्ति न चामित्रादिदूषणम् ।"
अत्र मालानिर्णयो मालाशब्दे द्रष्टव्यः । पुर-
श्चरणं तच्छब्दे द्रष्टव्यम् । कलावतीदीक्षा कला-
वतीशब्दे द्रष्टव्या ।

अथ पञ्चायतनीदीक्षा । यामले ।
"भवानीन्तु यदा मध्ये ऐशान्यामच्युतं यजेत् ।
आग्नेय्यां पार्व्वतीनाथं नैरृत्यां गणनायकम् ॥
वायव्यां तपनञ्चैव पूजाक्रम उदाहृतः ।
यदा तु मध्ये गोविन्दं ऐशान्यां शङ्करं यजेत् ॥
आग्नेय्यां गणनाथञ्च नैरृत्यां तपनं तथा ।
वायव्यामम्बिकाञ्चैव भोगमोक्षैकभूमिकाम् ॥
शङ्करञ्च यदा मध्ये ऐशान्यामच्युतं यजेत् ।
आग्नेय्यां तपनञ्चैव नैरृत्यां गणनायकम् ॥
वायव्यां पार्व्वतीञ्चैव स्वर्गमोक्षप्रदायिनीम् ।
आदित्यञ्च यदा मध्ये ऐशान्यां शङ्करं यजेत् ।
आग्नेय्यां गणनाथञ्च नैरृत्यां केशवं यजेत् ॥
वायव्यामम्बिकां देवीं स्वर्गसाधनभूमिकाम् ॥
गणनाथं यदा मध्ये ऐशान्यां केशवं यजेत् ।
आग्नेय्यामीश्वरञ्चैव नैरृत्यां तपनं तथा ॥
वायव्यामीश्वरीञ्चैव पूजयेन्मोक्षसाधनीम् ।
स्वस्थानवर्ज्जिता देवा दुःखशोकभयप्रदाः ॥"
तथा च गणेशविमर्षिण्याम् ।
"शम्भौ मध्यगते हरीनहरभूदेव्यो हरौ शङ्करे
भास्ये नागसुता रवौ हरगणेशाजाम्बिकाः
स्थापिताः ।
देव्यां विष्णुहरैकदन्तरवयो लम्बोदरेऽजेश्वरे
नार्य्याः शङ्करभागतोऽतिसुखदा व्यस्तास्तु ते
हानिदाः ॥"
रामार्च्चनचन्द्रिकायां गौतमीये च ।
"यदा तु मध्ये गोविन्दं आग्नेय्यां गणनायकम् ।
नैरृत्यां हंसमभ्यर्च्य वायव्यामर्च्चयेच्छिवाम् ॥
ऐशान्यां शङ्करं चैव भोगमोक्षफलाप्तये ॥" इति ।
यदङ्गदेवतायाः पूजने आग्नेय्यादौ गणेशादि-
पूजनमुक्तं तद्रामगोपालविषयमिति केचित् ।
वस्तुतो वैकल्पिकमिति सम्प्रदायः ॥ एतेषां
पूजनन्तु गौतमीये ।
"गन्धादिभिरथाभ्यर्च्य षडङ्गार्च्चनमेव च ।
विंशत्यो जपेन्मन्त्रं नमस्कृत्य समापयेत् ॥"*॥
अङ्गदेवतापूजाकालस्तु पीठपूजानन्तरम् ।
तथा च सनत्कुमारतन्त्रे ।
"पीठस्यार्च्चनमङ्गदेवयजनं प्राणप्रतिष्ठा तथा
आह्वानं निजमुद्रिकाविरचनं ध्यानं प्रभोः
पूजनम् ।"
यत्तु देवे पुष्पाञ्जलिं दत्त्वा अङ्गदेवान् समर्च्चयेत् ।
तत्तु प्रतिष्ठितयन्त्रादिविषयम् ॥ * ॥
यन्त्रातिरिक्ताधारे पूजने तु कुलावल्याम् ।
"एकपीठे पृथक्पूजां विना यन्त्रं करोति यः ।
अङ्गाङ्गित्वं परित्यज्य देवताशापमाप्नुयात् ॥"
एवञ्च ।
"आवाह्य देवतामन्यामर्च्चयंस्त्वन्यदेवताम् ।
उभाभ्यां लभते शापं मन्त्री तरलदुर्म्मतिः ॥"
तदेतदतिरिक्तविषयम् ॥ * ॥
सर्व्वेषामङ्गमन्त्राणां सिद्धादिविचारो नास्ति ।
तथा च,
"सिद्धादिशोधनं नैषां अङ्गत्वे सति राजवत् ॥"
श्यामादौ तु पञ्चायतनाभावः ।